नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **22**

# P-95-Sanskritam-II

No. of Printed Pages – **7**

# प्रवेशिका परीक्षा, 2024
# PRAVESHIKA EXAMINATION, 2024
# संस्कृतम्
# (द्वितीय प्रश्नपत्रम्)

**समय** : **3:15 (सपादहोरात्रयम्)**

**पूर्णांक** : **80**

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) **सर्वे** प्रश्नाः अनिवार्याः ।

(3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव लेख्यम् ।

(4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

**खण्डः – अ**

1. वस्तुनिष्ठप्रश्नाः – **15 × 1 = 15**

(i) आत्मनः बन्धुः कः ? **1**

(अ) वपुः (ब) आत्मा

(स) रामः (द) क्रोधः

(ii) मृदङ्गः मुखलेपेन किं करोति ? **1**

(अ) तीव्रध्वनिम् (ब) कर्कशध्वनिम्

(स) अल्पध्वनिम् (द) मधुरध्वनिम्

(iii) रामः कति वर्षाणि दण्डकारण्ये निवसेत् इति कैकेयी इच्छति ? **1**

(अ) द्वादशवर्षाणि (ब) त्रयोदशवर्षाणि

(स) चतुर्दशवर्षाणि (द) पञ्चदशवर्षाणि

(iv) अस्मिन् लोके कः जीवः श्लाघ्यतमः ? **1**

(अ) विवेकी (ब) चाटुकारः

(स) धनिकः (द) निर्धनः

(v) गुरुदक्षिणार्थी शिष्य कः ? **1**

(अ) कौत्सः (ब) रघुः

(स) वरतन्तुः (द) रामः

(vi) पञ्चतन्त्रे तन्त्राणि सन्ति – **1**

(अ) सप्त (ब) अष्ट

(स) षड् (द) पञ्च

(vii) कम्बुग्रीवः आसीत् – **1**

(अ) कच्छपः (ब) हंसः

(स) वायसः (द) शशकः

(viii) ताम्रचूडस्य मित्रम् आसीत् – **1**

(अ) हिरण्यकः (ब) वृहत्स्फिक् – नामा परिव्राजकः

(स) लघुपतनकः (द) कच्छपः

(ix) स्वर्णहंस–स्वर्णपक्षिराजकथायां राज्ञः नाम आसीत् – **1**

(अ) देवदत्तः (ब) चित्ररथः

(स) देवव्रतः (द) विष्णु शर्मा

(x) 'अहो गजोऽयं युष्मत्कुलशत्रुः' इति केन कथितम् ? **1**

(अ) मूषकेन (ब) सिंह्या

(स) गजेन (द) शृगालेन

(xi) शतबुद्धिः सहस्रबुद्धिश्च निवसतः स्म – **1**

(अ) वने (ब) ग्रामे

(स) जलाशये (द) नद्याम्

(xii) बालक–शब्दस्य सप्तमीविभक्ति – एकवचनस्य रूपमस्ति – **1**

(अ) बालके (ब) बालकाय

(स) बालकात् (द) बालकस्य

(xiii) भवत् – शब्दस्य तृतीयाविभक्ति – एकवचनस्य रूपमस्ति – **1**

(अ) भवतः (ब) भवता

(स) भवद्भ्याम् (द) भवान्

(xiv) अस् – धातोः लङ्लकार – प्रथमपुरुषस्य एकवचने रूपमस्ति – **1**

(अ) अस्ति (ब) आस्ताम्

(स) स्यात् (द) आसीत्

(xv) जि–धातोः विधिलिंङ्–लकार–मध्यमपुरुषस्य – एकवचने रूपमस्ति – **1**

(अ) जयेयुः (ब) जयेत्

(स) जयेः (द) जय

2. रिक्तस्थानानि पूरयत – **7 × 1 = 7**

(i) नैनं छिन्दन्ति _________ नैनं दहति पावकः । **1**

(ii) नानाफलं _________ कल्पलतेव भूमिः । **1**

(iii) पीत्वा रोगद्रवमयजलं _________ ह्यन्तकोऽपि । **1**

(iv) स कूर्म इव _________ काष्ठात् भ्रष्टो विनश्यति । **1**

(v) ननमयययुतेयं मालिनी _________ लोकैः । **1**

(vi) प्रस्फुटं _________ साम्यमुपमेत्यभिधीयते । **1**

(vii) अमरा निर्जरा _________ त्रिदशा विबुधाः सुराः । **1**

3. अतिलघूत्तरात्मकप्रश्नाः – **10 × 1 = 10**

(i) मनस्विनः द्वयी वृत्तिः कस्य इव भवति ? **1**

(ii) अभिषेकं परित्यज्य रामः कुत्र गतवान् ? **1**

(iii) विवेकानन्दस्य गुरुः कः ? **1**

(iv) नृपः रघुः कुत्र निवासार्थं कौत्साय कथयति ? **1**

(v) अनावृष्टिवशात् किं जातम् ? **1**

(vi) महिलारोप्यस्य समीपे कस्य मठायतनम् आसीत् ? **1**

(vii) वृहत्पक्षीः कीदृश आसीत् ? **1**

(viii) सिंही कति–पुत्रम् अजीजनत् ? **1**

(ix) विमले जले कः क्रीडति ? **1**

(x) सिंह्या कः एकान्ते नीत्वा प्रबोधितः ? **1**

## खण्डः – ब

लघूत्तरात्मकप्रश्नाः – **12 × 2 = 24**

4. भारतभूवैजयन्ती विवेकानन्देन कथम् उच्चैः नीता ? **2**

5. पुरुषस्य कानि–कानि न फलन्ति ? **2**

6. कच्छपः कथं मृतः ? **2**

7. ताम्रचूडः किं कृत्वा प्राणयात्रां समाचरति ? **2**

8. वसन्ततिलकाछन्दसः लक्षणं लिखत । **2**

9. मन्दाक्रान्ताछन्दसः उदाहरणं लिखत । **2**

10. विशेषोक्ति – अलंकारस्य लक्षणं लिखत । **2**

11. 'हंसीव कृष्ण ! ते कीर्तिः स्वर्गङ्गामवगाहते' इत्यत्र कः अलंकारः ? **2**

12. अमरकोशानुसारं कृष्णस्य नामद्वयं लिखत । **2**

13. अमरकोशानुसारं गरुडस्य नामद्वयं लिखत । **2**

14. लता–शब्दस्य तृतीया–विभक्तेः रूपाणि लिखत । **2**

15. दा–धातोः लट्–लकार–प्रथमपुरुषस्य रूपाणि लिखत । **2**

**खण्डः – स**

दीर्घोत्तरात्मकाः प्रश्नाः – **4 × 3 = 12**

16. अधोलिखितयोः द्वयोः श्लोकयोः **एकस्य** सप्रसंग – व्याख्या कार्या । **1 + 2 = 3**

(क) यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।

(ख) तं भूपतिर्भासुरहेमराशिं
लब्धं कुबेरादभियास्यमानात् ।
दिदेश कौत्साय समस्तमेव
पादं सुमेरोरिव वज्रभिन्नम् ।।

17. अधोलिखितयोः श्लोकयोः **एकस्य** सप्रसंग–व्याख्या लेखनीया । **1 + 2 = 3**

(क) वचो हि सत्यं परमं विभूषणं,
लज्जाङ्गनायाः कृशता कटौ च ।
द्विजस्य विद्यैव पुनस्तथा क्षमा,
शीलं हि सर्वस्य नरस्य भूषणम् ।।

(ख) शब्दे शब्दे भुवनजयिनी तस्य सन्मन्त्रशक्तिः,
पादे पादे सुदृढनिहिते कास्विदुत्साहशक्तिः ।
तद् दृक्पातैर्जनगणमनः स्वाहिता राष्ट्रशक्तिः,
तत्सञ्चारैः प्रथममुदिताभारती धर्मशक्तिः ।।

18. अधोलिखितयोः श्लोकयोः **एकस्य** सप्रसंग–भावार्थः लेख्यः । **1 + 2 = 3**

(क) तत्र मे याचितो राजा भरतस्याभिषेचनम् ।
गमनं दण्डकारण्ये तत्र चाद्यैव राघव ।।

(ख) जनस्य साकेतनिवासिनस्तौ,
द्वावप्यभूतामभिनद्यसत्वौ ।
गुरुप्रदेयाधिकनिः स्पृहोऽर्थी,
नृपोऽर्थि कामादधिकप्रदश्च ।।

19. भवान् रमेशः, राजकीय-प्रवेशिका-संस्कृत-विद्यालयः, दुर्गानगरस्य छात्रः रुग्णताकारणेन अवकाशाय प्रधानाध्यापकाय प्रार्थनापत्रं लिखतु । **3**

**अथवा**

भवतः ग्रामस्य विकासाय विधायक – महोदयाय पत्रं लिखतु ।

**खण्डः – द** **3 × 4 = 12**

20. अधोलिखितयोः गद्ययोः कस्यचिदेकस्य सप्रसंगं व्याख्या कार्या । **1 + 3 = 4**

(क) स च राज्ञः शरणं गतोऽब्रवीत् – 'देव ! एते पक्षिण एव वदन्ति, यद् – 'अस्माकं राजा किं करिष्यति ।' न कस्याऽप्यावासं दद्मः ।' मया चोक्तं – 'न शोभनं युष्माभिरभिरभिहितम् । अहं गत्वा राज्ञे निवेदयिष्यामि । एवं स्थिते देवः प्रमाणम् ।'

(ख) ततो मण्डूक आह – 'भो ! शतबुद्धे ! श्रुतं धीवरोक्तं भवता । तत्किमत्र युज्यते कर्तुम् । पलायनमवष्टम्भो वा । यत्कर्तुं युक्तं भवति तदादिश्यतामद्य ।' तच्छ्रुत्वा सहस्रबुद्धिः प्रहस्य प्राह – 'भो मित्र ! मा भैषीः । यतो वचनश्रवणमात्रादेव भयं न कार्यम् ।'

21. **एकस्याः** कथायाः सारांशः संस्कृतभाषायां लिखत – **4**

(क) हिरण्यकताम्रचूडकथा ।

(ख) सिंहशिशुशृगालपुत्रकथा ।

22. कमप्येकं विषयमवलम्ब्य शतपदेषु निबन्धं लिखत – **4**

(क) कालिदासः

(ख) महाराणाप्रतापः

(ग) संस्कृतदिवसः

---

DO NOT WRITE ANYTHING HERE